गवेष्ठिश्च गवाक्षश्च तालकेतुश्च वीर्य्यवान् ।
एते मनुष्यधर्म्मास्तु दनोः पुत्रा मया स्मृताः ॥१६॥
दैत्यदानवसंहर्षे जाता भीमपराक्रमाः ।
सिंहिकायामथोत्पन्ना विप्रचित्तिसुतास्त्विमे ॥१७॥
सैंहिकेया इति ख्याताश्चतुर्द्दश महासुराः ।
शतगाश्च(१) बलश्चाव्यासः शाम्बस्तथैव च ॥१८॥
अनुलोमः शुचिश्चैव वातापिश्च सितांशुकः ।
हरः कल्पः कालनाभो भौमश्च नरकस्तथा ॥१९॥
राहुर्ज्येष्ठस्तु तेषां वै चन्द्रसूर्य्यप्रमर्दनः ।
इत्येते सिंहिकापुत्रा देवैरपि दुरासदाः ॥२०॥
दारुणाभिजनाः क्रूराः सर्वे ब्रह्मद्विषश्च ते ।
दशान्यानि सहस्राणि सैंहिकेयो गणः स्मृतः ॥२१॥
निहतो जामदग्न्येन भार्गवेण बलीयसा ।
स्वर्भानोस्तु प्रभा कन्या पुलोम्नोऽथ शची तथा ॥२२॥
उपदानवीमयस्यापि शर्मिष्ठा वार्षपर्वणी ।
पुलोमा कालिका चैव(२) वैश्वानरसुते उभे ॥२३॥
प्रभाया नहुषः पुत्रो जयन्तश्च शचीसुतः ।
पुरुं जज्ञेऽथ शर्मिष्ठा दुष्मन्तमुपदानवी ॥२४॥
वैश्वानरसुते श्वेते पुलोमा कालिका उभे ।
उभे अपि तु ते कन्ये मारीचस्य परिग्रहे ॥२५॥

---

१ शतशाव्यश्चेति ङ० ।
२ कालिका चैवेति ग० ।

Digitized by Google

ताभ्यां पुत्रसहस्राणि षष्टिर्दानवपुङ्गवाः।
चतुर्दश तथान्यानि हिरण्यपुरवासिनां ॥२६॥
पौलोमाः कालकेयाश्च दानवाः सुमहाबलाः।
अवध्या दानवानां ते निहताः सव्यसाचिना ॥२७॥
मयस्य जाता ये पुत्राः सर्व्वे वीरपराक्रमाः।
मयावी दुन्दुभिश्चैव वृषश्च महिषस्तथा ॥२८॥
बालिको वज्रकर्णश्च कन्या मन्दोदरी तथा।
दैत्यानां दानवानाञ्च सर्ग एष प्रकीर्त्तितः ॥२९॥
दनायुषायाः(१) पुत्रास्तु सुताः पञ्च महाबलाः।
अरुरुर्बलिजम्भौ च विरक्षश्च विषस्तथा ॥३०॥
अरुरोस्तनयः क्रूरो धुन्धुर्नाम महासुरः।
निहतः कुवलाश्वेन उतङ्कवचनात् किल ॥३१॥
बलेः पुत्रौ महावीर्य्यौ तेजसाऽप्रतिमावुभौ।
कुम्भिलश्चक्रवर्म्मा(२) च स कर्णः पूर्वजन्मनि ॥३२॥
विरक्षस्यापि पुत्रौ द्वौ कालकश्च वरश्च तौ।
विषस्य त्वभवन् पुत्राश्चत्वारः क्रूरकर्म्मणः।
आद्यहा यज्ञहा चैव ब्रह्महा पशुहा तथा ॥३३॥
ख्याता दनायुषापुत्राः वृत्रस्यापि निबोधत।
जज्ञिरे सुमहाघोराद्वृत्रस्येन्द्रेण युध्यतः ॥३४॥

---

१ अनम्बुषाया इति ख०, ग० च।
२ कुठिकश्चक्रधर्म्मा चेति ग०।

Digitized by Google

श्लेष्मातकतरुष्वेते प्रायशस्तु कृतालयाः ।
इत्येते राक्षसाः क्रान्ताः[१] यक्षस्यापि निबोधत ॥१३०॥
चकमेऽप्सरसं यक्षः पञ्चस्थूलां क्रतुस्थलीम् ।
तां लिप्सुश्चिन्तमानस्य नन्दनं स चचार ह ॥१३१॥
वैभ्राजं सुरभिश्चैव तथा चैत्ररथञ्च यत् ।
दृष्टवान् नन्दने तस्मिन्नप्सरोभिः सहासतीम् ॥१३२॥
नोपायं विन्दते तत्र तस्या लाभाय चिन्तयन् ।
दूषितः स्वेन रूपेण कर्म्मणा तेन दूषितः ॥१३३॥
समोद्विजन्ते भूतानि भयात्तस्य सर्वशः ।
तत्कथं नाम चार्व्वङ्गीं प्राप्नुयामहमङ्गनाम् ॥१३४॥
दृष्ट्वोपायं ततः सोऽथ शीघ्रकारी व्यवर्त्तत ।
कृत्वा रूपं बहुमतं[२] गन्धर्व्वस्य तु गुह्यकः ।
ततः सोऽप्सरसां मध्ये तां जग्राह क्रतुस्थलीम् ॥१३५॥
बुद्ध्वा च सुहृच्चिन्तं सा भावेनैवाभ्यवर्त्तत ।
संवृतः स तया सार्द्धं दृश्यमानोऽप्सरोगणैः ॥१३६॥
तत्र स सिद्धकरणः सद्यो जातः सुतोऽस्य वै ।
परिणाहोच्छ्रयैर्युक्तः सद्यो वृत्तो ज्वलन् श्रिया ॥१३७॥
राजाहमिति नाभिर्हि[३]पितरं सोऽभ्यभाषत ।
तवाच जाते न भीतिः पिता तं प्रत्युवाच ह ॥१३८॥

---

१ प्रोक्ता इति ख० ।
२ बहुरूपे इति ङ० ।
३ नारीत्यामिति ख० ।

Digitized by Google

मनसा काङ्क्षितं यद्यत् तत्तद्दद्युः पितामहाः ॥४७॥
पितरो दुष्टमनसो रक्षांसि विमनांसि च ।
भवन्त्येव कृते श्राद्धे नित्यमेव प्रयत्नतः ॥४८॥
शूद्राः श्राद्धे चीरवाससः(१) बल्वजास्तरणस्तथा ।
वारणाश्च खराश्चैव खरवर्षाश्च नित्यशः ।
एवमादीन्यथान्यानि दूषणानि परिवर्जयेत् ॥४९॥
अञ्जनाभ्यञ्जनागन्धामानुप्रलयनं(२) तथा ।
काणैः पुनर्भवैः कार्य्यं सर्व्वमेव फलं भवेत् ॥५०॥
काणाः पुनर्भवा ये च वर्द्धणा उपवर्द्धणाः ।
अथ ते पितरो देवा देवाश्च पितरः पुनः ॥५१॥
पुष्पगन्धादिधूपानामेष मन्त्र उदाहृतः ।
आहृत्य दक्षिणायान्तु होमार्थे विप्रयत्नतः ॥५२॥
सोमाय वै पितृमते स्वधा अङ्गिरसे नमः ।
अस्वर्ग्यं लौकिकं वापि जुहुयात् कर्म्मसिद्धये ॥५३॥
अन्तराधाय समिधं तथा होमो विधीयते ।
समाहितेन मनसा प्रयताग्निः प्रयत्नतः ॥५४॥
अग्नये कव्यवाहाय स्वधा अङ्गिरसे नमः ।
यमाय चैवाङ्गिरसे स्वधा नम इति ब्रुवन् ॥५५॥
इत्येते वै होममन्त्रा मन्त्राणामनुपूर्व्वशः ।
दक्षिणातोऽग्नये नित्यं सोमायान्तरतस्तथा ॥५६॥
एतयोरन्तरं नित्यं जुहुयाद्वै विवस्वते ।

१ पाठोऽयमादर्शसम्मते मुद्रितः। परन्त्वयं न समीचीनः।
२ अयमपि पाठो न समीचीनः।

Digitized by Google

ब्राह्मणानां सहस्रेभ्यो योगी त्वग्राशने यदि ।
यजमानञ्च भोक्तॄंश्च नौरिवाम्भसि तारयेत् ॥ १८ ॥
असतां प्रग्रहो यत्र सताञ्चैव विमानना ।
दण्डो देवकृतस्तत्र सद्यः पतति दारुणः ॥ १९ ॥
हित्वागमं सुधर्माणां बालिशं यत्र भोजयेत् ।
आदिकर्म समुत्सृज्य दाता तत्र विनश्यति ॥ २० ॥
पिण्डमग्नौ सदा दद्याद्भोगार्थी तु प्रयत्नतः ।
प्रजार्थी पत्नये(१) दद्यान्मध्यमं तत्र पूर्वकं ॥ २१ ॥
उत्तमां द्युतिमन्विच्छन् गोषु नित्यं प्रयच्छति ।
प्रज्ञां पूजां यशः कीर्त्तिं गोषु नित्यं प्रयच्छति ॥ २२ ॥
प्रार्थयन् दीर्घमायुश्च(२) वायसेभ्यः प्रयच्छति ।
सौकुमार्यमथान्विच्छन् कुक्कुटेभ्यः प्रयच्छति ॥ २३ ॥
एवमेतत्समुद्दिष्टं पिण्डनिर्वपणात् फलं ।
आकाशं गमयेद्वापि स्थितौ सुदक्षिणामुखः ।
पितॄणां स्थानमाकाशं दक्षिणा चैव दिग्भवेत् ॥ २४ ॥
एकं विप्राः पुनः प्राहुः पिण्डोद्धरणमग्रतः ।
अनुज्ञाते तु तैर्विप्रैर्यानमुद्ध्रियतामिति ॥ २५ ॥
पुष्पाणाञ्च फलानाञ्च भक्ष्याणामन्नतस्तथा ।
अग्रमुद्धृत्य सर्वेषां जुहुयाज्जातवेदसि ॥ २६ ॥
भक्ष्यमन्नं तथा पेयमनुक्तमफलानि च ।

---

१ पत्नये इति ङ०, च० च । परन्त्वयं पाठो न समीचीनः ।
२ वीर्य्यमायुश्चेति ख० ।

| | | Rs. | |
|---|---|---|---|
| 18. | Gopatha Bráhmana, Fasc. I and II @ /10/ each | 1 | 4 |
| 19. | Gopála Tápaní, Fasc. I | 0 | 10 |
| 20. | Gobhilíya Gṛihya Sútra, Fasc. I—XII @ /10/ each | 7 | 8 |
| 21. | Hindu Astronomy, Fasc. I—III @ /10/ each | 1 | 14 |
| 22. | Íśá Kena Kaṭha Praśna Muṇḍa Máṇḍukya Upanishads, Fasc. VI | 0 | 10 |
| 23. | Kátantra, Fasc. I—VI @ 1/ each | 6 | 0 |
| 24. | Kathá Sarit Ságara, English, Fasc. I—IX @ 1/ each | 9 | 0 |
| 25. | Kaushitaki Bráhmaṇopanishad, Fasc. I and II @ /10/ each | 1 | 4 |
| 26. | Lalita Vistara, Fasc. I—VI @ /10/ each | 3 | 12 |
| 27. | Ditto English, Fasc. I—II | 2 | 0 |
| 28. | Maitri Upanishad, Fasc. I—III @ /10/ each | 1 | 14 |
| 39. | Mímámsá Darṣana, Fasc. I—XVI @ /10/ each | 10 | 0 |
| 30. | Márkaṇḍeya Puráṇa, Fasc. IV—VII @ /10/ each | 2 | 8 |
| 31. | Nṛisiṃha Tápaní, Fasc. I—III @ /10/ each | 1 | 14 |
| 32. | Nirukta, Fasc. I—IV @ /10/ each | 2 | 8 |
| 33. | Nárada Pancharátra, Fasc. I, III—IV @ /10/ each | 1 | 14 |
| 34. | Nyáya Darṣana, Fasc. I and III @ /10/ each | 1 | 4 |
| 35. | Nítisára, or, The Elements of Polity, By Kámandaki, Fasc. II—IV (Fasc. I out of stock) | 1 | 14 |
| 36. | Piñgala Chhandaḥ Sútra, Fasc. I—III @ /10/ each | 1 | 14 |
| 37. | Prithiráj Rásau, Fasc. I—IV @ /10/ each | 2 | 8 |
| 38. | Ditto English, Fasc. I | 1 | 0 |
| 39. | Páli Grammar, English, Fasc. I and II @ /10/ each | 1 | 4 |
| 40. | Prákṛita Lakshaṇam, Fasc. I | 1 | 8 |
| 41. | Rig Veda, Vol. I, Fasc. IV | 0 | 10 |
| 42. | Śrauta Sútra of Ápastamba, Fasc. I—III @ /10/ each | 1 | 14 |
| 43. | Ditto Áśvaláyana, Fasc. I—XI @ /10/ each | 6 | 14 |
| 44. | Ditto Láṭyáyana Fasc. I—IX @ /10/ each | 5 | 10 |
| 45. | Sáma Veda Saṃhitá, Fasc. I—XXXVII @ /10/ each | 23 | 2 |
| 46. | Sáhitya Darpaṇa, Fasc. I—IV @ /10/ each | 2 | 8 |
| 47. | Sáñkhya Aphorisms of Kapila, Fasc. I and II @ /10/ each | 1 | 4 |
| 48. | Súrya Siddhánta, Fasc. IV | 0 | 10 |
| 49. | Sarva Darṣana Sangraha, Fasc. II | 0 | 10 |
| 50. | Sañkara Vijaya, Fasc. II and III @ /10/ each | 1 | 4 |
| 51. | Sáñkhya Pravachana Bháshya, English, Fasc. III | 0 | 10 |
| 52. | Sáñkhya Sára, Fasc. I | 0 | 10 |
| 53. | Taittiríya Áraṇyaka, Fasc. I—XI @ /10/ each | 6 | 14 |
| 54. | Ditto Bráhmaṇa Fasc. I—XXIV @ /10/ each | 15 | 0 |
| 55. | Ditto Saṃhitá, Fasc. I—XXXII @ /10/ each | 20 | 0 |
| 56. | Ditto Prátiśákhya, Fasc. I—III @ /10/ each | 1 | 14 |
| 57. | Ditto and Aitareya Upanishads, Fasc. II and III @ /10/ each | 1 | 4 |
| 58. | Ditto Aitareya Śvetáśvatara Kena Íśá Upanishads, English, Fasc. I and II @ /10/ each | 1 | 4 |
| 59. | Táṇḍyá Bráhmaṇa, Fasc. I—XIX @ /10/ each | 11 | 14 |
| 60. | Uttara Naishadha, Fasc. I—XII @ /10/ each | 7 | 8 |
| 61. | Váyu Puráṇa, Vol. I, Fasc. I—VI; Vol. II, Fasc. I—II @ /10/ each | 5 | 0 |
| 62. | Vishṇu Smṛiti, Fasc. I—II @ /10/ each | 1 | 4 |
| 63. | Yoga Sútra of Patanjali, English, Fasc. I | 0 | 14 |

*Arabic and Persian Series.*

| | | | |
|---|---|---|---|
| 1. | 'Álamgírnámah, with Index, Fasc. I—XIII @ /10/ each | 8 | 2 |
| 2. | Áín-i-Akbarí, Persian text, Fasc. I—XXII @ 1/4 each | 27 | 8 |
| 3. | Ditto English Translation, Vol. I (Fasc. I—VII) | 12 | 4 |
| 4. | Akbarnámah, with Index, Fasc. I—XX @ 1/4 each | 25 | 0 |
| 5. | Bádsháhnámah with Index, Fasc. I—XIX @ /10/ each | 11 | 14 |
| 6. | Dictionary of Arabic Technical Terms and Appendix, Fasc. I—XXI @ 1/4 each | 26 | 4 |
| 7. | Farhang-i-Rashídí (complete), Fasc. I—XIV @ 1/4 each | 17 | 8 |
| 8. | Fihrist Ṭúsí, or, Ṭúsy's list of Shy'ah Books, Fasc. I—IV @ /12/ each | 3 | 0 |
| 9. | Futúḥ-ul-Shám Waqidí, Fasc. I—IX @ /10/ each | 5 | 10 |
| 10. | Ditto Ázádí, Fasc. I—IV @ /10/ each | 2 | 8 |
| 11. | Haft Ásmán, History of the Persian Masnawi, Fasc. I | 1 | 4 |
| 12. | History of the Caliphs, English, Fasc. I—VI @ 1/ each | 6 | 0 |
| 13. | Iqbálnámah-i-Jahángírí, Fasc. I—III @ /10/ each | 1 | 14 |
| 14. | Iṣabáh, with Supplement, Fasc. I—XXIX @ /12/ each | 21 | 12 |

Digitized by Google

कुर्य्यात् सन्निहितं नित्यं प्राग्वत्तीर्थे कमण्डलुं ।
असत्कार्यं कार्यमेतैर्यथावत् पादधावनं ॥२५॥
आचमनं द्वितीयेन देवकार्यं ततः परं ।
उपवासस्त्रिरात्रन्तु दुष्टहस्ते सुदाहृतः ॥२६॥
विप्रकृष्टेन कृच्छ्रेण प्रायश्चित्तमुदाहृतं ।
स्पृष्ट्वाश्वानं श्वपाकं वा तप्तकृच्छ्रं समाचरेत् ॥२७॥
मानुषास्थीनि संस्पृश्य उपोष्यं शुद्धिकारणं ।
त्रिरात्रमुक्तं सस्नेहमेकरात्रमतोऽन्यथा ॥२८॥
कारस्कराः पुलिन्दाश्च तथान्ध्रशबरादयः ।
पीत्वा चापोभूतिलये गत्वा चैव युगन्धरां ॥२९॥
सिन्धोरुत्तरपर्य्यन्तं तथा दिव्यन्तरे व्रतं ।
पापदेशाश्च ये केचित् पापैरध्युषिता जनैः ॥३०॥
शिष्टैश्च वर्जिता ये च ब्राह्मणैर्वेदपारगैः ।
गत्वा देशानपुण्यांस्तु कृत्स्नं पापं समश्नुते ॥३१॥
मनोध्यक्षि[1] रथाग्निश्च काले चैवोपलेपनं ।
विख्यापनञ्च[2] शौचानां नित्यमज्ञानमेव च ॥३२॥
अतोन्यथा तु यः कुर्यान्मोहाच्छौचस्य सङ्करं ।
पिशाचान् यातुधानांश्च फलं गच्छत्यसंशयं ॥३३॥
शौचमश्रद्दधानश्च म्लेच्छजातिषु जायते ।

---

१ मनोध्यमिरिति ख० च० ।
२ प्रत्याख्यानमिति पाठोयुक्तः ।

Digitized by Google

उद्दिश्य देवानुत्सृष्टं येनैषां मानितं यशः ॥ २२॥
तत्र तद्युद्धमभवत् प्रत्यक्षन्तारकामयं ।
देवानां दानवानाञ्च लोकक्षयकरं महत् ॥ २३॥
तत्र शिष्टास्तयोर्देवास्तुषिताश्चैव ये स्मृताः ।
ब्रह्माणं शरणं जग्मुरादिदेवं पितामहं ॥ २४॥
ततोनिवार्योशनसं रुद्रं ज्येष्ठञ्च शङ्करं ।
ददावाङ्गिरसे तारां स्वयमेव पितामहः ॥ २५॥
अन्तर्वत्नीञ्च तां दृष्ट्वा तारान्ताराधिपाननां ।
गर्भमुत्सृजसे न त्वं विप्रः प्राह बृहस्पतिः ॥ २६॥
मदीयायां तनौ योनौ गर्भोधार्यः कथञ्चन ।
अथो नावसृजत्तन्तु कुमारं दस्युहन्तमं ॥ २७॥
ईषिकास्तम्बमासाद्य ज्वलन्तमिव पावकं ।
जातमात्रोथ भगवान् देवानामाक्षिपद्वपुः ॥ २८॥
ततः संशयमापन्नास्तारामकथयन् सुराः ।
सत्यं ब्रूहि सुतः कस्य सोमस्याथ बृहस्पतेः ॥ २९॥
ह्रीयमाना यदा देवान्नाह सा साध्वसाधु वा ।
तदा तां शप्तुमारब्धः कुमारोदस्युहन्तमः ॥ ४०॥
सन्निवार्य तदा ब्रह्मा तारां चन्द्रस्य संशयः ।
यदत्र तथ्यन्तद्ब्रूहि तारे कस्य सुतस्त्वयं ॥ ४१॥
सा प्राञ्जलिरुवाचेदं ब्रह्माणं वरदं प्रभुं ।
सोमस्येति महात्मानं कुमारन्दस्युहन्तमं(१) ॥ ४२॥

(१) महात्मैव कुमारोदस्युहन्तमः इतिप्रथमान्तपाठः समीचीनः ।

Digitized by Google

आवेश्यात्मनि तान् सर्व्वान् संख्यायापञ्चवा(३)स्तथा ।
लोकान् सप्त इमान् सर्व्वान् महाभूतानि पञ्च च ॥ २४५॥
त्रिगुणानां सह संयुक्तं करोति विकरोति च ।
स रुद्रो यः सामगयस्तथैव च यजुर्मयः ॥ २४६॥
स एष उत प्रोतश्च बहिरन्तश्च निश्चयात् ।
एको हि भगवानाद्य(२) अभावी शान्तशुद्धिजाः ॥ २४७॥
ततस्ते ऋषयः सर्वे दिवाकरसमप्रभाः ।
अन्तश्चरांस म(१)मारोप्याग्निं तथात्मनि ॥ २४८॥
कर्मणा मनसा वाचा विशुद्धेनान्तरात्मनि ।
अनन्यमनसो भूत्वा प्रपद्यन्ते महेश्वरं ॥ २४९॥
व्रतोपवासनिरताः सर्वभूतदयापराः ।
योगमनुपमन्दिव्यं प्राप्तं तैश्छिन्नसंशयैः ॥ २५०॥
प्रपद्य परया भक्त्या ज्ञानयुक्तेन तेजसा ।
तैर्लब्धं रुद्रसालोक्यं शाश्वतं परमव्ययं ॥ २५१॥
यः पठेत्तपसा युक्तो वायुप्रोक्तामिमां स्तुतिं ।
ब्राह्मणः क्षत्रियो वापि वैश्यो वा स्वक्रियापरः ॥ २५२॥
लभते रुद्रसालोक्यं भक्तिमान् विगतज्वरः ।

---

(१) अयं पाठो लेखकप्रमादात्समजनि ।

(२) शाद्य इति क० ।

(३) तस्य स्या असमं वासमिति ङ० च०, तस्य असमञ्च वाससमिति छ० । एते पाठा अर्थैर्हीनाः । अत्र सं असमाअमसंवासमितिपाठोऽर्थप्रतिपत्तिकरः ।

नानाद्रुमलताकुञ्जकूजत्पक्षिनिनादितं ।
क्षुत्पिपासाभयक्रोधतापग्लानिविवर्जितं ॥६३॥
नानावर्णैर्बहुविधैः पद्मिनीखण्डमण्डितैः ।
जातरूपमयाम्लानकूलतटसञ्चारपक्षिभिः ॥६४॥
शुक्लमम्भोजपवनैः सेव्यमानं समन्ततः ।
निर्वैरध्यासितम्भावैर्हिंस्रैः सत्त्वैः समुज्झितं ॥६५॥
निर्जनं दिव्यलतिकाप्रियखण्डविराजितं ।
शुकैः पारावतैर्हंसैरुन्मदमत्तकोकिलम् ॥६६॥
उत्पतत्पतगरवां पद्मामोददिङ्मुखं ।
तत्रापि काञ्चनी दिव्या गुहा परमशोभना ॥६७॥
तां प्रविश्य जिताहारो जितचित्तो जितासनः ।
सस्मार वेदांश्चतुरस्तदेकाग्रमना मुनिः ॥६८॥
स्मृती जगाम सरदां(१) ततस्य(२) स्मरतोऽस्य हि ।
प्रादुरासंस्ततो वेदाश्चत्वारश्चारुदर्शनाः ॥६९॥
स्फुरत्पद्मपलाशाक्षा जटामुकुटधारिणः ।
कुम्भमुष्टिकराम्भोजा मृगचर्मसम्पिण्डितांसकाः ॥७०॥
स्वरैः शोभनभिः कृशवदनाः प्रशान्ताकाराः ।
कचवर्गाङ्गवैवर्ण्यैः पञ्चावयवपाणयः ॥७१॥
पवर्गद्वन्द्वचरणा यामपादास्तवर्गतः ।
आन्तरन्तस्थवर्णाश्च येषां कुक्षिद्वयात्मकौ(३) ॥७२॥

---

(१) सुभद्रा इति पाठः समीचीनः ।
(२) तत्र तां इति पाठः साधुः ।
(३) कुक्षिद्वयात्मकाः इति पाठः सङ्गतः ।

गयातीर्थं सर्व्वदेशे[१] तीर्थेभ्योऽप्यधिकं शृणु ॥४॥
गयासुरस्तपस्तेपे ब्रह्मणा क्रतवेऽर्थितः।
प्राप्तस्य तस्य शिरसि शिलां धर्मो ह्यधारयत्[२] ॥५॥
तत्र ब्रह्माऽकरोद्यागं स्थितश्चापि गदाधरः[३]।
फल्गुतीर्थादिरूपेण निश्चलार्थमहर्निशं।
गयासुरस्य विप्रेन्द्र ब्रह्माद्यैर्दैवतैः सह[४] ॥६॥
कृतयज्ञो ददौ ब्रह्मा ब्राह्मणेभ्यो गृहादिकं।
श्वेतकल्पे तु वाराहे गयायागमकारयत् ॥७॥
गयानाम्ना गया ख्याता[५] क्षेत्रं ब्रह्माभिकाङ्क्षितं[६]।
काङ्क्षन्ति पितरः पुत्रान्नरकाद्भयभीरवः ॥८॥
गयां यास्यति यः पुत्रः स नस्त्राता भविष्यति।
गयाप्राप्तं सुतं दृष्ट्वा पितृणामुत्सवो भवेत्।
पद्भ्यामपि जलं स्पृष्ट्वा सोऽस्मभ्यं किं न दास्यति ॥९॥
गयां गत्वान्नदाता यः पितरस्तेन पुत्रिणः।
पक्षत्रयनिवासी च पुनात्यासप्तमं कुलं।
नो चेत् पञ्चदशाहं वा सप्तरात्रिं त्रिरात्रिकं[७] ॥१०॥

(१) गयातीर्थंश्रेष्ठेति मुद्रितपु०।
(२) गयासुरस्तपस्तेपे ब्रह्मा तत्र जगाम ह। छलेन पातयित्वोर्व्व्यां शिलां तन्मूर्द्ध्न्यधारयत्। इति मुद्रितपु०।
(३) स्थापयित्वा गदाधरमिति मुद्रितपु० ॥
(४) गयासुरस्य विप्रेन्द्र एतच्छ्लोकार्द्धं न साधु, मुद्रितपुस्तकेऽपि न विद्यते।
(५) गयाख्यानमिति मुद्रितपु०।
(६) ब्रह्मर्षिकाङ्क्षितमिति मुद्रितपु०।
(७) एतच्छ्लोकार्द्धं मुद्रितपुस्तके न दृश्यते।

Digitized by Google

